इत्युपक्रम्याह ।
"लोहाजवक्त्रो जवनः कुम्भवक्त्रश्च कुम्भकः ॥")
वेगयुक्ते त्रि । इति मेदिनी । ने, ६६ ॥ ( यथा, महाभारते । ३ । २६ । २६ ।
"अपायाज्जवनैरश्वैः शाम्बशरप्रपीड़ितः ॥")

जवनालं, क्ली, (जवनाय अलति पर्य्याप्नोतीति । अल + अच् ।) फलविशेषः । जनार इति भाषा ॥ अस्य गुणाः । स्वादुत्वम् । शीतत्वम् । वायुकारित्वम् । कफपित्तनाशित्वञ्च । इति राजवल्लभः ॥

जवनिका, स्त्री, ( जवनं वेगेन प्रतिरोधनमस्त्यस्याः । जवन + ठन् । टाप् च । ) व्यवधायकवस्त्रम् । कानात् इति भाषा ॥ तत्पर्य्यायः । प्रतिसीरा२ तिरस्करिणी ३ । इत्यमरः । २।६।१२० ॥ यवनिका ४ यमनिका ५ तिरस्कारिणी ६ । इति तट्टीका ॥ अन्तस्पटः ७ पटी ८ चित्रा ९ काण्डपटः १० । इति शब्दरत्नावली ॥ ( यथा, माघे । ४ । ५४ ।
"समीरशिशिरः शिरःसु वसतां
सतां जवनिका निकामसुखिनाम् ॥" )

जवनी, स्त्री, ( जूयते आच्छाद्यतेऽनया । जु + करणे ल्युट् । स्त्रियां ङीप् । ) अपटी । कानात् इति भाषा ॥ ( यथा, आर्य्यासप्तशत्याम् । ५३८ ।
"व्रीड़ाप्रसरः प्रथमं तदनु च रसभावपुष्टचेष्टेयम् ।
जवनीविनिर्गमादनु नटीव दयिता मनो
हरति ॥")
ओषधीभेदः । इति हेमचन्द्रः ॥ (जवनजातिस्त्री । यथाह ।
"जवनी नवनीतकोमलाङ्गी
शयनीये यदि नीयते कथञ्चित् ॥"
वेगशीला । यथा, ऋग्वेदे । १ । ५१ । २ ।
"इन्द्रं दक्षास ऋभवो मदच्युतं
शतक्रतुं जवनी सूनृतारुहत् ॥" )

जवसं, क्ली, ( जूयते भक्षार्थं प्राप्यते गवादिभिरिति । जु + बाहुलकात् कर्म्मणि असच् । ) घासः । इति शब्दरत्नावली ॥

जवा, स्त्री, ( जवते रक्तवर्णत्वं गच्छतीति । जु गतौ + अच् । ततष्टाप् । ) स्वनामख्यातपुष्पवृक्षः । तत्पर्य्यायः । ओड्रपुष्पम् २ । इत्यमरः । २ । ४ । ७६ ॥ जपा ३ ओड्राख्या ४ रक्तपुष्पी ५ अर्कप्रिया ६ रागपुष्पी ७ प्रतिका ८ हरिवल्लभा ९ । ( यथा, माघे । ६ । ४६ ।
"अनुवनं वनराजिवधूमुखे
बहलरागजवाधरचारुणि ॥")
अस्या गुणाः । कटुत्वम् । उष्णत्वम् । इन्द्रलुप्तविनाशकारित्वम् । विस्फोटजन्तुजनकत्वम् । सूर्य्याराधनसाधनत्वञ्च । इति राजनिर्घण्टः ॥ मलमूत्रस्तम्भनरक्तभ्रमकारित्वम् । इति राजवल्लभः ॥
(यस्मिन्नियं व्यवह्रियते तद्यथा,—
"सकाञ्जिकं जवापुष्पं भृष्टं ज्योतिष्मतीदलम् ।
दूर्व्वापिष्टञ्च संप्राश्य वनिता लार्त्तवं लभेत् ॥"
इति वैद्यकचक्रपाणिसंग्रहे योनिव्यापदधिकारे ।)

जवादि, क्ली, सुगन्धिद्रव्यभेदः । तत्पर्य्यायः । गन्धराजम् २ कृत्रिमम् ३ मृगघर्म्मजम् ४ सम्मूहगन्धम् ५ गन्धाढ्यम् ६ स्निग्धम् ७ साम्राणिकर्द्दमम् ८ सुगन्धतैलनिर्य्यासम् ९ कटुमोदम् १० । अस्य लक्षणम् । नीरसत्वम् । स्निग्धत्वम् । ईषत्पिङ्गत्वम् । सुगन्धदत्वम् । आतपे बहलामोदत्वम् । राज्ञां योग्यत्वञ्च । अस्य गुणाः । सौगन्धिकत्वम् । स्निग्धत्वम् । उष्णत्वम् । सुखावहत्वम् । वाते हितत्वम् । राज्ञां मोहनाह्लादकारकत्वञ्च । इति राजनिर्घण्टः ॥

जवाधिकः, पुं, (जवेन वेगेन अधिकः ।) वेगाधिकघोटकः । इत्यमरः । २ । ८ । ४५ ॥ अतिशयवेगयुक्ते, त्रि ॥

जवापुष्पं, क्ली, ( जवायाः स्वनामख्यातवृक्षस्य पुष्पम् । यद्वा, जवेव पुष्पम् । ) ओड्रपुष्पम् । इति शब्दरत्नावली ॥

जवी, [ न् ] त्रि, ( जवो वेगः सोऽस्यास्तीति । जव + इनिः । ) वेगयुक्तः । इति हेमचन्द्रः । ३ । १५८ ॥ ( यथा, याज्ञवल्क्ये । २ । १११ ।
"समकालमिषुं क्षिप्तमानीयान्यो जवी नरः ।
गते तस्मिन् निमग्नाङ्गं पश्येच्चेत् शुद्धिमाप्नुयात् ॥"
पुं, उष्ट्रः । घोटकः । इति राजनिर्घण्टः ॥

जष, ञ वधे । इति कविकल्पद्रुमः ॥ ( भ्वां-उभं-सकं-सेट् । ) ञ, जषति जषते । परस्मैपदीत्यन्ये । इति दुर्गादासः ॥

जस, इ क रक्षणे । इति कविकल्पद्रुमः ॥ ( चुरां-परं-सकं-सेट । ) इ क, जंसयति । इति दुर्गादासः ॥

जस, उ इर् य मोक्षे । इति कविकल्पद्रुमः ॥ ( दिवां-परं-सकं-सेट् । उदित्त्वात् क्त्वावेट् । ) उ, जसित्वा जस्त्वा । इर्, अजसत् अजासीत् । असात् पुषादित्वात् नित्यं ङ इत्यन्ये । य, जस्यति वत्सं गोपः । इति दुर्गादासः ॥

जस, क वधे । अनादरे । इति कविकल्पद्रुमः ॥ ( चुरां-परं-सकं-सेट् । ) क, जासयति । इति दुर्गादासः ॥

जसुरिः, पुं, ( जस्यते मुच्यते हन्यते वाऽनेनेति । जस + "जसिसहोरुरिन् ।" उणां । २ । ७३ । इति उरिन् । ) वज्रम् । इत्युणादिकोषः ॥

जहकः, पुं, ( जहाति परित्यजतीति । ओ हाक् लि त्यागे + "जहातेर्द्वे च ।" उणां । २ ।३४ । इति वुन् द्वित्वञ्च । ) कालः । इति त्रिकाण्डशेषः ॥ त्यागकर्त्तरि, त्रि । इत्युणादिकोषः ॥ बालः । निर्म्मोहः । निर्म्मोकः । इति संक्षिप्तसारे उणादिवृत्तिः ॥

जहा, स्त्री, (जहातीति । हा + बाहुलकात् शः ।) मुण्डितिका । इति शब्दचन्द्रिका ॥ मुण्डिरी इति भाषा ॥

जहानकः, पुं, प्रलयः । इति हेमचन्द्रः । २ । ७५ ॥

जहुः, पुं, ( जहातीति । हा + बाहुलकात् उन् द्वित्वञ्च । ) अपत्यम् । यथा । "इति कृतानुषङ्ग आसनशयनाटनस्नानादिषु सह मृगजहुना स्नेहानुबद्धहृदयः आसीत् ।" इति श्रीभागवते पञ्चमस्कन्धे आदिभरतचरिते । ८ । ११ ॥
"इत्येवं कृतोऽनुषङ्गो आसक्तिर्य्येन । मृगजहुना मृगापत्येन सह । स्नेहानुबद्धं हृदयं येन ।"
इति तट्टीकायां श्रीधरस्वामी ॥

जह्नुः, पुं, ( जहातीति । हा + "जहातेर्द्वे अन्तलोपश्च ।" उणां । ३ । ३६ । इति नुः द्वित्वमन्तलोपश्च । ) विष्णुः । राजर्षिभेदः । स चन्द्रवंशोद्भवकुरुराजपुत्त्रः । गङ्गागमनकाले येन गङ्गा पीता पुनर्भगीरथप्रार्थनेन ऊरुं भित्त्वा बहिर्निर्गमिता तेन सा जाह्नवीति ख्याता । इति रामायणम् ॥

जह्नुतनया, स्त्री, ( जह्नोस्तनया । ) गङ्गा । इत्यमरः । १ । १० । ३१ ॥

जह्नुसप्तमी, स्त्री, ( जह्नोः सप्तमी । अस्यां तिथौ जह्नुमुनिना हि गङ्गा पीता पुनस्त्यक्ता अतोऽस्यास्तथात्वम् । ) वैशाखशुक्लसप्तमी । तन्नामकारणं यथा वाराहे नारदाम्बरीषसंवादे ।
"वैशाखशुक्लसप्तम्यां जाह्नवी जह्नुना पुरा ।
क्रोधात् पीता पुनस्त्यक्ता कर्णरन्ध्रात्तु दक्षिणात् ॥
तस्यां समर्च्चयेद्देवीं गङ्गां भुवनमेखलाम् ।
स्नात्वा सम्यग्विधानेन स धन्यः सुकृती नरः ॥
तस्यां सन्तर्पयेद्देवान् पितॄन् मन्त्रार्न् यथाविधि ।
साक्षात् पश्यन्ति ते गङ्गास्नातकं गतपातकम् ॥"
इति श्रीहरिभक्तिविलासे १४ विलासः ॥
अपि च उत्तरकामाख्यातन्त्रे ११ पटले ।
"शुक्लपक्षस्य सप्तम्यां वैशाखे जह्नुपुत्त्रिकाम् ।
प्रपूजयेत् सुखार्थाय स्वर्गमोक्षफलाप्तये ॥"

जह्नुसुता, स्त्री, ( जह्नोः सुता । ) गङ्गा । इति राजनिर्घण्टः ॥ (यथा, महाभारते ।१।९८।१८।
"अहं गङ्गा जह्नुसुता महर्षिगणसेविता ॥")

जा, स्त्री, ( जायते सम्बन्धिनी या । जन + बाहुलकात् डः ।) याता । भर्त्तुर्भ्रातृपत्नी । इत्येकाक्षरकोषः ॥

जागरः, पुं स्त्री, ( जागृ जागरणे + भावे घञ् । "जाग्रोऽविचीति ।" ७ । ३ । ८५ । इति गुणः ।) जागरणम् । इत्यमरः । २ । ८ । ६४ ॥ ( यथा, आर्य्यासप्तशत्याम् । ३६० ।
"प्रोञ्छति तवापराधं मानं मर्द्दयति निद्रां
हरति ।
स्वलतामिहन्ति शपथान् जागरदीर्घा निशा
सुभग ! ॥"
जागर्त्ति जीवति संग्रामस्थलेऽनेनेति । जागृ + करणे घञ् । ) कवचे, पुं । इति तट्टीका ॥

जागरणं, क्ली, ( जागृ + भावे ल्युट् । ) निद्राभावः । जागा इति भाषा ॥ तत्पर्य्यायः । जागर्य्या २ जागरा ३ जागरः ४ । इति हेमचन्द्रः ॥ जागिया ५ जागर्त्तिः ६ । इत्यमरटीका ॥ ( यथा, महाभारते । ३ । १२६।१२ ।
"रात्रिजागरणात् श्रान्ताः सौद्युम्निः समतीयतान् ॥")